# द्वितीयाध्यायस्य तृतीयः पादः

## अनभिहिते । (१/५३६)

अनभिहिते इत्यधिकारो[1]ऽयं वेदितव्यः । यदित ऊर्ध्वमनुक्रमिष्यामः, अनभिहिते इत्येवं [2]तद् वेदितव्यम् । अनभिहिते अनुक्ते, [3]अनिर्दिष्टे कर्मादौ[4] विभक्तिर्भवति । केनानभिहिते ? तिङकृत्तद्धितसमासैः परिसङ्ख्यानम् (म. भा. १. ४४०) । वक्ष्यति, 'कर्मणि द्वितीया' (२. ३. २/५३७) -- कटं करोति । ग्रामं गच्छति[5] । अनभिहिते इति किम् ? [6]तिङ -- क्रियते [7]कटः । [8]कृत् -- कृतः [9]कटः । [10]तद्धितः -- [11]शत्यः । शतिकः[12] (५. १. २१/१६८६) । समासः -- प्राप्तमुदकं [13]यं ग्रामं प्राप्तोदको ग्रामः ।

परिसङ्ख्यानं किम् ? कटं करोति भीष्ममुदारं दर्शनीयम् (म. भा. १. ४४०) । 'बहुषु बहुवचनम्' (१. ४. २१/१८७) इत्येवमादिना सङ्ख्या वाच्यत्वेन विभक्तीनामुपदिष्टाः, तत्र विशेषणार्थमिदमारभ्यते -- अनभिहितकर्माद्याश्रयेष्वेकत्वादिषु द्वितीयादयो वेदितव्याः(म. भा. १. ४४०) [14]इति ॥

## कर्मणि द्वितीया । (२/५३७)

द्वितीयादयः शब्दाः पूर्वाचार्यैः सुपां त्रिकेषु स्मर्यन्ते, तैरेवात्र व्यवहारः । कर्मणि कारके या सङ्ख्या तत्र द्वितीया विभक्तिर्भवति । कटं करोति । ग्रामं गच्छति ।

[११८] उभसर्वतसोः कार्या धिगुपर्यादिषु त्रिषु ।
द्वितीयाऽऽम्रेडितान्तेषु ततोऽन्यत्रापि दृश्यते ॥ (म. भा. १. ४४४)

उभयतो ग्रामम् । सर्वतो ग्रामम् । धिग् देवदत्तम्[15] । उपर्युपरि [16]ग्रामम् । अध्यधि [17]ग्रामम् । अधोऽधो ग्रामम् ।

[११९] [18]अभितःपरितःसमयानिकषाहा[19]प्रतियोगेषु च दृश्यते । (म. भा. १. ४४३)

अभितो ग्रामम् । परितो ग्रामम् । समया ग्रामम् । निकषा ग्रामम् । हा [20]देवदत्तम् । बुभुक्षितं न प्रति भाति किञ्चित् (म. भा. १. ४४३) ॥

## तृतीया च होश्छन्दसि । (३/३३९४)

कर्मणि इति वर्तते । द्वितीयायां प्राप्तायां तृतीया विधीयते । चशब्दात् सा [21]च भवति । छन्दसि विषये जुहोतेः [22]कर्मणि कारके तृतीया विभक्तिर्भवति, द्वितीया च । 'यवाग्वाऽग्निहोत्रं जुहोति' (शां. श्रौ. सू. ३. १२. १६) । 'यवागूमग्निहोत्रं जुहोति' (शां. श्रौ. सू. ३. १२. १६) । छन्दसि इति किम् ? [23]यवागूमग्निहोत्रं जुहोति ॥

---

1. अयं नास्ति ब. ह, वेदितव्यः नास्ति ड. 2. तद् नास्ति ब. फ. 3. अनिर्दिष्टे नास्ति ड. 4. द्वितीया इत्यधिकम् फ. 5. ओदनं पचति इत्यधिकम् ह. 6. तिङा ह. 7. घटः फ. 8. कृता ह. 9. घटः फ, हृतो भारः इत्यधिकम् फ. 10. तद्धितेन ह. 11. शतेन क्रीतः इत्यधिकम् क. ड. इ. फ. ह, शत्यः पटः क, नास्ति ब. 12. साहस्रः इत्यधिकम् क. ड. 13. यं नास्ति ड. फ. 14. इति नास्ति इ. फ. 15. जाल्मं इत्यधिकम् ह, धिग् जाल्मान् इत्यधिकम् फ. ग. 16–17. लोकम् ग. 18. अभितः नास्ति ग. 19. °प्रतियोगे ड. 20. ग्रामम् इ. 21. अपि भवेत् ह, अपि ड. 22. कर्मकारके फ, कारके नास्ति ड. 23. यवागूं जुहोति इ. फ, यवागूः जुहोति ह.